# M.Phil 1st Semester Examination, 2019

## SANSKRIT

PAPER—SAN-112

*Full Marks* : 40

*Time* : 2 hours

Answer **all** questions

*The figures in the right-hand margin indicate marks*

*Candidates are required to give their answers in their own words as far as practicable*

*Illustrate the answers wherever necessary*

सर्वेषां प्रश्नानामुत्तरं संस्कृतेनैव प्रदेयम्

अधोनिर्दिष्टेषु विंशतिप्रश्नानाम् उत्तरं देयम् — 2 × 20

1. 'Vedic Bibliography' इति ग्रन्थस्य सम्पादकः कः ? ग्रन्थस्य विषयः कः ?

2. शुल्वसूत्रस्य क उपयोग: ?

3. 'मैत्रायणीसंहिता' — इति ग्रन्थस्य वङ्गानुवादक: क: ? अद्यावधि ग्रन्थस्य कति खण्डा: प्रकाशिता: ?

4. कातन्त्रव्याकरणं केन प्रणीतम् ? अस्य नामान्तरमुल्लिख्य वृत्ति-कारस्य नाम उच्यताम् ।

5. कारकोल्लास: कस्य कृति: ? तस्य समयो वा क: ?

6. दीधितिटीका केन विरचिता ? दीधिते: कति टीका: सन्ति ?

7. नाट्यशास्त्रस्य कति प्रवृत्तय: ? काश्च ता: ?

8. सप्तपदार्थी केन विरचिता ? तन्नामकरणे किं तात्पर्यम् ?

9. अभिधावृत्तिमातृका-ग्रन्थस्य रचयिता क: ? तस्य सम्पादक: क: ?

10. वाल्मीकीयरामायणमाश्रित्य लिखितानां चतुर्णां काव्यग्रन्थाणां नामानि लिख्यन्ताम् ।

11. श्रीजीवन्यायतीर्थस्य आधुनिककालस्य चतुर्णाम् ऐतिहासिक-नाटकानां नामानि उल्लिख्यन्ताम् ।

12. रघुनाथन्यायालङ्कारस्य परिचय: दीयताम् ।

13. वैदिकवाङ्मयाश्रितानां चतुर्णां कोषग्रन्थानां नामोल्लेख: कार्य: ?

14. 'अनुकूल-गलहस्तकम्' — इति कस्य कृतिः ? तस्य नाटकस्य वैशिष्ट्यं किम् ?

15. श्रीहर्षेण विरचिताः कियन्तो ग्रन्थाः सन्ति ? नैषधीयचरितस्य उपजीव्यं किमस्ति ।

16. 'कप्फिणाभ्युदयं' कस्य कृतिः ? तस्य ग्रन्थस्य सम्पादकः कः ?

17. 'A Grammar of the Sanskrit Language' — इति पुस्तकं केन प्रणीतम् ? अत्र कस्य व्याकरणस्य अनुकरणम् अस्ति ? अस्य वैशिष्टमेकं प्रकाश्यताम् ।

18. श्रीधराचार्यस्य परिचयः दीयताम् ।

19. लक्ष्मणसेनस्य सभापण्डितेन श्रीमता पुरुषोत्तमदेवेन रचितेषु वृत्तिग्रन्थेषु त्रयाणां नामानि उल्लिख्यन्ताम् ।

20. सामाजिकसमस्यावलम्बने रचितेषु लघुकथासु चतुर्णां नामानि उल्लिख्यन्ताम् ।

21. रामपालचरितं केन विरचितम् ? कश्च तत्र विषयः ?

22. श्रीतकोषस्य प्रकाशकः कः ?

23. हरिनामामृतव्याकरणस्य विभक्तिः ततपुरुषः पदं च कैः नामभिः उल्लिखितम् ।

**24.** तत्वचिन्तामणेः कति टीकाग्रन्थाः सन्ति ? के च ते ?

**25.** न्यायकुसुमाञ्जलेः कति टीकाः सन्ति ? काश्च ताः ?

---